क्रं. ५५

संस्कृत

ललितसहस्त्रनाम

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥१॥

(1)

॥ अथललितासहस्रनामप्रारंभः ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

ललिता॰ ॥१॥

श्रीगणेशायनमः॥ श्रीगुरुभ्योनमः॥ श्रीसरस्वत्यैनमः॥ श्रीकुलदेव
ताभ्योनमः॥ ॥अगस्त्युवाच॥ अश्वाननमहाबुधेसर्वशास्त्रविशार
द॥कथितंललितादेव्याश्चरितंपरमाद्भुतं॥१॥पूर्वंप्रादुर्भवोमातुस्त
तःपट्टाभिषेचनं॥ भंडासुरवधश्चैवविस्तरेणत्वयोदितः॥२॥वर्णितं
श्रीपुरंचापिमहाभविभवविस्तरं॥श्रीमत्पंचदशाक्षर्यामहिमावर्णित
स्तथा॥३॥षोडान्यासादयोन्यासान्यासखंडसमीरिताः॥अंतर्यागक्रम
श्चैवबहिर्यागक्रमस्तथा॥४॥महायागक्रमश्चैवपूजाखंडेप्रकीर्तिताः॥
पुरश्चरणखंडेतुजपलक्षणमीरितं॥५॥होमखंडेत्वयाप्रोक्तोहोमद्रव्यवि
धिक्रमः॥चक्रराजस्यविद्यायाः ~~चक्रराजस्य~~ श्रीदेव्यादेशिकात्मनोः॥६॥
रहस्यखंडेतादात्म्यंपरस्परमुदीरितं॥स्तोत्रखंडेबहुविधास्तुतिकीर्तिताः॥७॥ यःपरि
मंत्रिणीदंडिनीदेव्योःप्रोक्तंनामसहस्रकं॥नतुतंललितादेव्याःप्रोक्तंनाम राम ॥१॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai — joint project of the

(2a)

सहस्रकं ॥८॥ तत्र मे संशयो जातो हयग्रीव दयानिधे ॥ किं त्वया विस्मृतं त
च्छिज्ञात्वा वा समुपेक्षितं ॥९॥ मम वा योग्यता नास्ति श्रोतुं नामसहस्रकं ॥ कि
मर्थं भवता नोक्तं कारणं तत्र मे वद ॥१०॥ सूत उवाच ॥ इति पृष्टो हयग्रीवो मु
निना कुंभजन्मना ॥ प्रहृष्टो वचनं प्राह तापसं कुंभसंभवं ॥११॥ हयग्रीव उवाच ॥
लोपामुद्रापतेगस्त्य सावधानमनाः शृणु ॥ नाम्नां सहस्रं यन्नोक्तं कारणं तद्वदा
मि ते ॥१२॥ रहस्यमिति मत्वाहं नोक्तवांस्ते न चान्यथा ॥ पुनश्च पृच्छसे भक्त्या
तस्मात्तत्ते वदाम्यहं ॥१३॥ ब्रूयाच्छिष्याय भक्ताय रहस्यमपि देशिकः ॥ भवता
न प्रदेयं स्यादभक्ताय कदाचन ॥ न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ॥
श्रीमातृभक्तियुक्ताय श्रीविद्याराजवेदिने ॥१५॥ उपासकाय शुद्धाय देयं नाम
सहस्रकं ॥ यानि नामसहस्राणि सद्यः सिद्धिप्रदानि हि ॥१६॥ तंत्रेषु ललितादे
व्यास्तेषु मुख्यमिदं मुने ॥ श्रीविद्यैव तु मंत्राणां तत्र कादिर्यथा परा ॥१७॥ पुराणां

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai, Jain project

(3)

ललि॰स॰ श्रीपुरमिवराक्षीनां ललिता~~[illegible]~~ यथा॥ श्रीविद्योपासकानांच यथा दे
॥२॥ वःपरःशिवः॥१८॥ तथा नामसहस्रेषु वरमेतत्प्रकीर्तितं॥ यथास्य पठणाद्दे
वि प्रीयताल्ललितांबिका॥१९॥ अन्यनामसहस्रपाठान्नप्रीलयं तथा॥ श्रीमातुः
प्रीयते तस्मादनिशं कीर्तयेदिदं॥ बिल्वपत्रैश्चक्रराजेयो र्चयेल्ललितांबिकां॥
पद्मैर्वा तुलसीपुष्पैरेभिर्नामसहस्रकैः॥२१॥ सद्यःप्रसादं कुरुते तस्य सिंहा
सनेश्वरी॥ चक्राधीराजमभ्यर्च जप्त्वा पंचदशाक्षरीं॥२२॥ जपांते कीर्तय
न्नित्यमिदं नामसहस्रकं॥ जपपूजाद्यशक्तश्चेत्पठेन्नामसहस्रकं॥२३॥
सांगार्चने सांगजपे यत्फलं तदवाप्नुयात्॥ उपासने स्तुतीरन्याः पठेदभ्युद राम
यो हि सः॥२४॥ इदं नामसहस्रमे कीर्तयेन्नित्यकर्मवत्॥ चक्रराजार्चनं दे ॥२॥
व्या जपो नाम्नां च कीर्तनं॥२५॥ भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः॥ भक्त
स्यावश्यकमिदं नामसाहस्रकीर्तनं॥२६॥ तत्र हेतुं प्रवक्ष्यामि शृणु त्वं कुंभसं

भव॥ पुरा श्रींपुरा देवी भक्तानां हितकाम्यया॥२७॥ वाग्देवी वशिनी मुख्याः
समाहूयेदमब्रवीत॥ वाग्देवता वशिन्याद्याः शृणुध्वं वचनं मम॥२८॥ भ
वत्यो मत्प्रसादेन प्रोल्लसद्वाग्विभूतयः॥ भक्तानां वाग्विभूतिप्रसादेन निय
योजिताः॥२९॥ मच्चक्रस्य रहस्यज्ञा मम नामपरायणाः॥ मम स्तोत्रं विधा
नाय तस्मादाज्ञापयामि वः॥३०॥ कुरुध्वमंकितं स्तोत्रं मम नामसहस्रकैः॥
येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत॥३१॥ इत्याज्ञप्ता वचोदेव्या
देव्याः श्रीललितांबया॥ रहस्यैर्नामभिर्देव्यः चक्रुःस्तोत्रमनुत्तमं॥३२॥
रहस्यनामसाहस्रमिति तद्विश्रुतं परं॥ ततः कदाचित्सदसि स्थित्वा
सिंहासनेंबिका॥३३॥ स्वसेवावसरं प्रादात्सर्वेषां कुंभसंभव॥ सेवार्थमाग
तास्तत्र ब्रह्माणी ब्रह्मकोटयः॥३४॥ लक्ष्मीनारायणानां च कोटयः समुपाग
ताः॥ गौरीकोटिसमेतानां रुद्राणामपि कोटयः॥३५॥ मुद्रिणी दंडिनी देव्यः

ललि० सेवार्थं या समागताः॥ शक्त्यो विविधाकारा तासां संख्या न विद्यते॥३६
दिव्यौघा मानवौघाश्च सिद्धौघाश्च समागताः॥ तत्र श्रीललितादेवी सर्वे
॥२॥ षां दर्शनं ददौ॥३७॥ तेषु दृष्ट्वोपविष्टेषु स्वे स्वे स्थाने यथाक्रमं॥ तत्र श्री
ललितादेविकटाक्षाक्षेपचोदिताः॥ उत्थाय वशिनीमुख्या बद्धांजलि
पुटास्तदा॥ अस्तुवन्नामसाहस्रैः स्वकृतैर्ललितांबिकां॥३९॥ श्रुत्वा स्तवं
प्रसन्नाभूल्ललितापरमेश्वरी॥ ते सर्वे विस्मयं जग्मुर्ये तत्र सदसि स्थिताः॥ ४०
ततः प्रोवाच ललिता सदस्यान्देवतागणान्॥ ममाज्ञयैव वाग्देव्यश्चक्रु
स्तोत्रमनुत्तमं॥४१॥ अंकितं नामभिर्दिव्यैर्मम प्रीतिविधायकैः॥ तत्पठध्वं सदा राम
यूयं मत्प्रीतिपरिवृद्धये॥४२॥ प्रवर्तयध्वं भक्तेषु मम नामसहस्रकं॥ इदं ॥३॥
नामसहस्रं मे यो भक्त्या प्रयतः पठेत्॥४३॥ स मे प्रियतमो भूयात्तस्मै कामान्
ददाम्यहं॥ श्रीचक्रे मां समभ्यर्च्य जप्त्वा पंचदशाक्षरीं॥४४॥ पश्चान्नामसहस्रं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

मे कीर्तनेन मम तुष्टये॥ मामर्चयतु वा मां वा विद्यां जपतु वा न वा॥४३॥ कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदा॥ मत्प्रीत्या सकलान् कामान् लभते नात्र संशयः॥४६॥ तस्मान्नामसहस्रं मे कीर्तयध्वं सदादरात्॥ हयग्रीव उवाच॥ इति श्रीललितेशानी शास्ति देवान् सहानुगान्॥ ॥४७॥ उक्त्वा श्रीललितादेवी तत्रैवांतरधीयत॥ तदा प्रभृति लोकेऽस्मिन् ब्रह्माविष्णुमहेश्वराः॥४८॥ शक्त्यो मुद्रिणीमुख्या इदं नामसहस्रकं॥ पठंति भक्त्या सततं ललितापरितुष्टये॥४९॥ तस्मादवश्यं भक्तेन कीर्तनीयमिदं मुने॥ आवश्यकं हेतुरत्र मया प्रोक्तो मुनीश्वर॥५०॥ इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया शृणु॥ ॥अस्य श्रीललितासहस्रनामस्तोत्रमंत्रस्य॥ श्रीहयग्रीव ऋषिः॥ पंक्तिः छंदः॥ श्रीललितांबा देवता॥ ऐं क ४ बीजं॥ सौः स ३ शक्तिः॥ क्लीं ह ५ कीलकं॥ ॥कूटत्रयद्विरावृत्त्या षडंगः॥ ध्यानं॥ बालार्कायुतभासुरां त्रिनयनां मंदस्मि

Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

ललि त्ताघन्मुखीराजच्चंद्रकलाधरां सुकबरीपुष्पालिचंद्राकुलां॥ कस्तूरीतिलकां
घनस्तनभरां पाशांकुशौ चेक्षु[illegible]वं कोदंडं कुसुमेषवं चदधतीं हस्तांबुजे संभजे ॥१॥
॥ ८ ॥ ॐ श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी॥ चिदग्निकुंडसंभूता देवकार्य
समुद्यता॥१॥ उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता॥ रागस्वरूपपाशाढ्या क्रो
धाकारांकुशोज्वला॥२॥ मनोरूपेक्षुकोदंडा पंचतन्मात्रसायका॥ निजारुणप्र
भापूरमज्जद्ब्रह्मांडमंडला॥३॥ चंपकाशोकपुन्नागसौगंधिकलसत्कचा॥
कुरुविंदमणिश्रेणी कनत्कोटीरमंडिता॥४॥ अष्टमीचंद्रविभ्राजदलिक
स्थलशोभिता॥ मुखचंद्रकलंकाभमृगनाभिविशेषका॥५॥ वदनस्मरमां राजिता
गल्यगृहतोरणचिल्लिका॥ वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना॥६॥ न ॥ ८ ॥
वचंपकपुष्पाभनासादंडविराजिता॥ ताराकांतितिरस्कारीनासाभरणभासु
रा॥७॥ कदंबमंजरीक्लृप्तकर्णपूरमनोहरा॥ ताटंकयुगलीभूततपनोडुपमं
डला॥८॥

"Joint project of the Rajewade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(5B)

पद्मरागशिलादर्शपरिभाविकपोलभूः ॥ नवविद्रुमबिंबश्रीन्यक्कारिरदनछ
छदा ॥ ९ ॥ शुद्धविद्यांकुराकारद्विजपंक्तिद्वयोज्वला ॥ कर्पूरवीटिकामोदस
माकर्षिदिगंतरा ॥ १० ॥ निजसल्लापमाधुर्यविनिर्भर्त्सितकछपी ॥ मंदस्मितप्र
भापूरमज्जत्कामेशमानसा ॥ ११ ॥ अनाकलितसादृश्यचिबुकश्रीविराजिता ॥
कामेशबद्धमांगल्यसूत्रशोभितकंधरा ॥ १२ ॥ कनकांगदकेयूरकमनीयभु
जान्विता ॥ रत्नग्रैवेयचिंताकलोलमुक्ताफलान्विता ॥ १३ ॥ कामेश्वरप्रेमरत्न
मणिप्रतिपणस्तनी ॥ नाभ्यालवालरोमालीलताफलकुचद्वयी ॥ १४ ॥ लक्ष्यरोम
लताधारतासमुन्नेयमध्यमा ॥ स्तनभारदलन्मध्यपट्टबंधवलित्रया ॥ १५ ॥
अरुणारुणकौसुंभवस्त्रभास्वत्कटीतटी ॥ रत्नकिंकिणिकारम्यरसनादाम
भूषिता ॥ १६ ॥ कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता ॥ माणिक्यमुकुटाव
कारजानुद्वयविराजिता ॥ १७ ॥ इंद्रगोपपरिक्षिप्तस्मरतूणाभजंघिका ॥ गू

ललि० गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता ॥१८॥ नखदीधितिसंछिन्ननम
ज्जनतमोगुणा ॥ पदद्वयप्रभाजालपराकृतसरोरुहा ॥१९॥ सिंजानमणि
॥५॥ मंजीरमंडितश्रीपदांबुजा ॥ मराली मंदगमना महालावण्यशेवधिः ॥२०॥
सर्वारुणानवद्यांगी सर्वाभरणभूषिता ॥ शिवकामेश्वरांकस्था शिवा स्वा
(6) धीनवल्लभा ॥२१॥ सुमेरुमध्यशृंगस्था श्रीमन्नगरनायिका ॥ चिंतामणिगृ
हांतस्था पंचब्रह्मासनस्थिता ॥२२॥ महापद्माटवीसंस्था कदंबवनवासिनी ॥
सुधासागरमध्यस्था कामाक्षी कामदायिनी ॥२३॥ देवर्षिगणसंघातस्तू
यमानात्मवैभवा ॥ भंडासुरवधोद्युक्तशक्तिसेनासमन्विता ॥२४॥ संपत्क
री समारूढसिंधुरव्रजसेविता ॥ अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरा ॥श्री॥ ५
वृता ॥२५॥ चक्रराजरथारूढमंत्रिणीपरिसेविता ॥ किरिचक्ररथारूढदंडना
थापुरस्कृता ॥२६॥ ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा ॥ भंडसैन्यव
सर्वायुधपरिष्कृता ॥ गेयचक्ररथारूढ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com